## समाहारः स्वरितः । (३१/७)

अच् इति वर्तते। उदात्तानुदात्तस्वर[1]समाहारो [2]योऽच् स स्वरितसञ्ज्ञो भवति। सामर्थ्याच् चात्र [3]लोकवेदयोः प्रसिद्धौ [4]गुणावेव वर्णधर्मावुदात्तानुदात्तौ गृह्येते, नाज्चौ । [5]तौ समाह्रियेते यस्मिन्नचि तस्य [6]स्वरितः इत्येषा संज्ञा [7]विधीयते । शिक्यम् । [8]कन्या । सामन्यः[9] । क्व । स्वरितप्रदेशाः—'तित् स्वरितम्' (६.१.१८५/३७२९) इत्येवमादयः ॥

## तस्यादित उदात्तमर्धह्रस्वम् । (३२/८)

[10]उदात्तानुदात्तस्वरसमाहारः [11]स्वरितः इत्युक्तम् । [12]तत्र न ज्ञायते [13]कस्मिन्नंशे उदात्तः [14]कस्मिन्ननुदात्तः, कियान् [15]वा उदात्तः कियान् वा अनुदात्तः इति। तदुभयम[16]नेनाख्यायते । [17]तस्य स्वरितस्य [18]आदावर्धह्रस्वमुदात्तम्, परिशिष्टमनुदात्तम्[19] । अर्धह्रस्वम् इति [20]चार्धमात्रोपलक्ष्यते । ह्रस्वग्रहणमतन्त्रम् । सर्वेषामेव ह्रस्वदीर्घप्लुतानां स्वरितानामेष[21] स्वरविभागः । शिक्यम् इत्यत्रार्धमात्रा आदित उदात्ता, [22]अपरार्धमात्रा अनुदात्ता, एकश्रुतिर्वा । कन्या इत्यत्रार्धमात्रा आदित उदात्ता [23]अध्यर्धमात्रा अनुदात्ता । माणवक३ माणवक (८.२.१०३/३६२२) इत्यत्रार्धमात्रा आदित उदात्ता [24]अर्धतृतीयमात्रा अनुदात्ता ॥

## एकश्रुति दूरात्सम्बुद्धौ । (३३/३६६२)

त्रैस्वर्ये[25] पदानां प्राप्ते दूरात् सम्बुद्धा[26]वैकश्रुत्यं विधीयते । एका श्रुतिर्यस्य तदिदमेकश्रुति । [27]एकश्रुति वाक्यं भवति । [28]दूरात् सम्बोधयति येन [29]वाक्येन तत् सम्बोधनं सम्बुद्धिः । न एकवचनं [30]सम्बुद्धिः । स्वराणामुदात्तादीनामविभागो [31]भेदतिरोधानमेकश्रुतिः । आगच्छ भो माणवक देवदत्त३ । दूरात् इति किम् ? [32] आगच्छ भो माणवक देवदत्त ॥

## यज्ञकर्मण्यजपन्यूङ्खसामसु । (३४/३६६३)

त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते । तेषां[33]यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते जपन्यूङ्खसामानि वर्जयित्वा । यज्ञकर्मणि मन्त्राणामै[34]कश्रुत्यं भवति । 'अग्निर्मूर्धा दिवः [35]ककुत् पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतो३म्' (ऋ. ८.४४.१६)। यज्ञकर्मणि इति किम्? सम्पाठे मा भूत्। अजपेष्विति किम्? 'ममाग्ने वर्चो विहवेष्वस्तु' (ऋ. १०.१२८.१) । जपोऽ[36]नुकरणमन्त्र उपांशुप्रयोगः । [37]अन्यूङ्खेति किम् ? [38]न्यूङ्खा ओकाराः

---

1. स्वर नास्ति फ, उदात्तानुदात्तयोः ह. 2. योऽच् स नास्ति अ. क. ह. 3. लोके वेदे च फ, लोकवेदप्रसिद्धौ ह. 4. गुणौ नास्ति ब. ह. 5. तावेतौ ड. 6. स्वरितसञ्ज्ञा भवति फ. 7. धीय धीय ह. 8. कन्यम् फ. 9. सामान्यः क. ह., सामन्यं ड. 10. उदात्तानुदात्तसमाहारः ड. फ, उदात्तानुदात्तयोः ह. 11. स्वरित नास्ति ह. 12. अत्र फ. 13. कस्मिन्नवकाशे फ.ह. 14. कस्मिन्नवकाशे फ. 15. भागः इत्यधिकम् फ. ह. 16. अनेन नास्ति क.फ. 17. तस्य स्वरितस्य नास्ति क.ड.फ. 18. आदावुदात्तमर्धह्रस्वम् ह. 19. इति इत्यधिकम् क.ड.फ. 20. अर्धमात्राकालो लक्ष्यते फ. ह, अर्धमात्रा लक्ष्यते क. 21. एव इत्यधिकम् ड. 22. अपरा नास्ति अ. क. 23. अपरा इत्यधिकम् ह. 24. अपरा इत्यधिकम् ह. 25. एव इत्यधिकम् फ. 26. °वेकश्रुत्यं ड. 27. एकश्रुति नास्ति ह. 28. दूरात् सम्बोधयति नास्ति क. 29. वाक्येन नास्ति क. 30. सम्बुद्धिः नास्ति फ. 31. अभेदतिरोधानम् ब, उदात्तादीनां विभागो ह. 32. समीपे मा भूत् क. 33. यज्ञकर्मणि फ. 34. ऐकश्रुतिः ग. 35. ककुप् क. 36. अकरणमन्त्रः ब, अन्तःकरणमन्त्रः पमं. 37. अन्यूङ्खेष्विति क. फ. 38. न्यूङ्खे ओकाराः षट् तेषु केचिदुदात्ताः, केचिदनुदात्ताः ओ ओ ओ ओ ओ ओ म् । असामसु इति किम् 'परे ममाग्ने वर्चो विहवेष्वस्तु क, ओंकाराः फ.